.. Bhava[naa] Upanishad ..

# ॥ भावोपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं
पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं
यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शान्तिः शान्तिः शान्तिः ॥

स्वाविद्यापदतत्कार्यं श्रीचक्रोपरि भासुरम् ।
बिन्दुरूपशिवाकारं रामचन्द्रपदं भजे ॥
हरिः ॐ ॥

आत्मानमखण्डमण्डलाकारमवृत्य सकलब्रह्माण्डमण्डलं
स्वप्रकाशं ध्यायेत् । श्रीगुरुः सर्वकारणभूता शक्तिः ॥ १॥
तेन नवरन्ध्ररूपो देहः ॥ २॥
नवचक्ररूपं श्रीचक्रम् ॥ ३॥
वाराही पितृरूपा कुरुकुल्ला बलिदेवता माता ॥ ४॥
पुरुषार्थाः सागराः ॥ ५॥
देहो नवरत्नद्वीपः ॥ ६॥
त्वगादि सप्तधातुरोमसंयुक्ताः ॥ ७॥
संकल्पाः कल्पतरवस्तेजः कल्पकोद्यानम् ॥ ८॥
रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणरसाः
षड्तवः [ लवणभेदाः षड्रसाः षड्तवः ]
॥ ९॥
[ क्रियाशक्तिः पीठम् । कुण्डलिनी ज्ञानशक्तिर्गृहम् ।
इच्छाशक्तिर्महात्रिपुरसुन्दरी । ज्ञाता होता ज्ञानमग्निः
ज्ञेयं हविः । ] ज्ञानमर्घ्यम् ज्ञेयम् हविर्ज्ञाता होता
ज्ञातृज्ञानज्ञेयानामभेदभावनम् श्रीचक्रपूजनम् ॥ १०॥
नियतिः श्रृङ्गारादयो रसा अणिमादयः ॥ ११॥
[ नियतिसहिताः शृङ्गारादयो नव रसा अणिमादयः ]
कामक्रोधलोभमोहमदमात्सर्यपुण्यपापमया
ब्राह्म्याद्यष्टशक्तयः ॥ १२॥
आधरनवकम् मुद्राशक्तयः ॥ १३॥
पृथिव्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वघ्राण-
वाक्पाणिपादपायूपस्थानि मनोविकाराः कामाकर्षिण्यादि षोडश
शक्तयः ॥ १४॥
वचनादानागमनविसर्गानन्दहानोपादानोपेक्षाख्य-
बुद्धयोऽनङ्गकुसुमाद्यष्टौ [ कुसुमादि शक्तयोऽष्टौ
] ॥ १५॥
अलम्बुसा कुहुर्विश्वोदरा वारणा हस्तिजिह्वा यशोवती पयस्विनी
गान्धारी पूषा शङ्खिनी सरस्वतीडा पिङ्गला सुषुम्ना चेति
चतुर्दश नाड्यः सर्वसऽक्षोभिण्यदि चतुर्दशशक्तयः
[ चतुर्दशारगा देवताः ] ॥ १६॥
प्राणापानव्यानोदानसमानानागकूर्मकृकरदेवदत्तधनंजया
दशवायवः सर्वसिद्धिप्रदादिबहिर्दशारगा देवताः ॥ १७॥
एतद्वायुसंसर्गकोपाधिभेदेन [ स्वायुदशकसंसर्गोपाधिस्
]
रेचकः पाचकः शोषकोदाहकः स्नावक इति प्राणमुख्यत्वेन
पंचधा जठरोऽग्निर्भवति ॥ १८॥
क्षारक उद्धारकः क्षोभको जुंभको मोहक इति नागप्राधान्येन
पञ्चविधास्ते
[ क्षारको दारकः क्षोभको मोहको जृम्भक
इत्यपालनमुख्यत्वेन पञ्चविधोऽस्ति तेन ] मनुष्याणां
देहगा
भक्ष्यभोज्यशोष्यलेह्यपेयात्मकपञ्चविधमन्नं पाचयन्ति ॥
१९॥
एता दशवह्निकलाः सर्वज्ञत्वाद्यन्तर्दशारगा देवताः ॥ २०॥
शीतोष्णासुखदुःखेच्छासत्त्वरजस्तमोगुणा
वशिन्यादिशक्तयोऽष्टौ ॥ २१॥
शब्दादि तन्मात्राः पंचपुष्पबाणाः ॥ २२॥
[ शब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राः पञ्च
पुष्पबाणा ]
मन इक्षुधनुः ॥ २३॥
[ वश्यो बाणो ] रागः पाशः ॥ २४॥
द्वेषोऽङ्कुशः ॥ २५॥
अव्यक्त [ महत्तत्त्व ] महदहङ्कार इति कामेश्वरी
वज्रेश्वरी
भगमालिन्योऽन्तस्त्रिकोणाग्रगा देवताः ॥ २६॥
निरुपाधिकसंविदेव कामेश्वर ॥ २७॥
सदानन्दपूर्ण स्वात्मेव परदेवता ललिता ॥ २८॥
लौहित्यमेतस्य सर्वस्य विमर्श ॥ २९॥
अनन्यचित्तत्वेन च सिद्धिः ॥ ३०॥
भावनायाः क्रिया उपचारः ॥ ३१॥
अहं त्वमस्ति नास्ति कर्तव्यमकर्तव्यमुपासितव्यमिति
विकल्पानामात्मनि विलापनम् होमः ॥ ३२॥

भवनाविषयाणामभेदभवना तर्पणम् ॥ ३३॥
पंचदशतिथिरूपेण कालस्य परिणामावलोकनम्
[ लोकनस्थितिः पञ्चदशनित्याः ] ॥ ३४॥
[ श्रद्धानुरूपा धीर्देवता । तयोः कामेश्वरी
सदानन्दघना परिपूर्णस्वात्मैक्यरूपा देवता ।
सलिलमिति लौहित्यकारणं सत्त्वम् ।
कर्तव्यमकर्तव्यमिति भावनायुक्त उपचारः ।
अस्ति नास्तीति कर्तव्यतानूपचारः ।
बाह्याभ्यन्तःकरणानां रूपग्रहणयोग्यतास्त्वित्यावाहनम् ।
तस्य बाह्याभ्यन्तःकरणानामेकरूपविषयग्रहणमासनम् ।
रक्तशुक्लपदैकीकरणं पाद्यम् ।
उज्ज्वलदामोदानन्दासनदानमर्घ्यम् ।
स्वच्छं स्वतःसिद्धमित्याचमनीयम् ।
चिच्चन्द्रमयीति सर्वाङ्गस्रवणं स्नानम् ।
चिदग्निस्वरूपपरमानन्दशक्तिस्फुरणं वस्त्रम् ।
प्रत्येकं सप्तविंशतिधा भिन्नत्वेनेच्छाज्ञानक्रियात्मक-
ब्रह्मग्रन्थिमद्रसतन्तुब्रह्मनाडी ब्रह्मसूत्रम् ।
स्वव्यतिरिक्तवस्तुसङ्गरहितस्मरणं विभूषणम् ।
सच्चित्सुखपरिपूर्णतास्मरणं गन्धः ।
समस्तविषयाणां मनसः स्थैर्येणानुसन्धानं कुसुमम् ।
तेषामेव सर्वदा स्वीकरणं धूपः ।
पवनावच्छिन्नोर्ध्वज्वलनसच्चिदुल्काकाशदेहो दीपः ।
समस्तयातायातवर्ज्यं नैवेद्यम् ।
अवस्थात्रयाणामेकीकरणं ताम्बूलम् ।
मूलाधारादाब्रह्मरन्ध्रपर्यन्तं गतागतरूपेण
प्रादक्षिण्यम् ।
तुर्यावस्था नमस्कारः ।
देहशून्यप्रमातृतानिमज्जनं बलिहरणम् ।
सत्यमस्ति कर्तव्यमकर्तव्यमौदासीन्यनित्यात्मविलापनं होमः ।
स्वयं तत्पादुकानिमज्जनं परिपूर्णध्यानम् । ]
एवम् मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावनापरो
जीवन्मुक्तो भवति ।[ तस्य देवतात्मैक्य सिद्धिः ।
चिन्तितकार्याण्ययत्नेन सिद्ध्यन्ति । ] स एव शिवयोगीति
गद्यते
[ कथ्यते । ] ॥ ३५॥
आदिमतेनान्तश्चक्रभावनाः प्रतिपादिताः [ कादिहादिमतोक्तेन
भावना प्रतिपादित । ] ॥ ३६॥
[ जीवन्मुक्तो भवति । ]
य एवं वेद सोऽथर्वशिरोऽधीते ॥ ३७॥
इत्युपनिषत् ॥
ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं
पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं
यदायुः।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु।
ॐ शान्तिः शान्तिः शान्तिः ॥
॥ इति भावोपनिषत् ॥